# द्वादशस्तोत्राणि

dvādaśastotrāṇi

## ॥ प्रथम स्तोत्रम् ॥

|| prathama stotram ||

वन्दे वन्द्यं सदानन्दं वासुदेवं निरञ्जनम् ।

इन्दिरापतिमाद्यादि वरदेश वरप्रदम् ॥ १ ॥

vande vandyaṁ sadānandaṁ vāsudevaṁ nirañjanam |
indirāpatimādyādi varadeśa varapradam || 1 ||

नमामि निखिलादीश किरीटाघृष्ठ पीठवत् ।

हृत्तमः शमनेऽर्काभं श्रीपतेः पादपङ्कजम् ॥ २ ॥

namāmi nikhilādīśa kirīṭāghṛṣṭha pīṭhavat |
hṛttamaḥ śamane'rkābhaṁ śrīpateḥ pādapaṅkajam || 2 ||

जाम्बूनदाम्बराधारं नितम्बं चिन्त्यमीशितुः ।

स्वर्णमञ्जीरसंवीतं आरूढं जगदम्बया ॥ ३ ॥

jāmbūnadāmbarādhāraṁ nitambaṁ cintyamīśituḥ |
svarṇamañjīrasaṁvītam ārūḍhaṁ jagadambayā || 3 ||

उदरं चिन्त्यं ईशस्य तनुत्वेऽपि अखिलम्बरं ।

वलित्रयाङ्कितं नित्यं आरूढं श्रियैकया ॥ ४ ॥

udaraṁ cintyam īśasya tanutve'pi akhilambaraṁ |
valitrayāṅkitaṁ nityam ārūḍhaṁ śriyaikayā || 4 ||

स्मरणीयमुरो विष्णोः इन्दिरावासमुत्तमैः ।

अनन्तं अन्तवदिव भुजयोरन्तरङ्गतम् ॥ ५ ॥

smaraṇīyamuro viṣṇoḥ indirāvāsamuttamaiḥ ।
anantam antavadiva bhujayorantaraṅgatam ।। 5 ।।

शङ्खचक्रगदापद्मधराश्चिन्त्या हरेर्भुजाः ।

पीनवृत्ता जगद्रक्षा केवलोद्योगिनोऽनिशम् ॥ ६ ॥

śaṅkacakragadāpadmadharāścintyā harerbhujāḥ ।
pīnavṛttā jagadrakṣā kevalodyogino'niśam ।। 6 ।।

सन्ततं चिन्तयेत्कण्ठं भास्वत्कौस्तुभभासकम् ।

वैकुण्ठस्याखिला वेदा उद्गीर्यन्तेऽनिशं यतः ॥ ७ ॥

santataṁ cintayetkaṇṭhaṁ bhāsvatkaustubhabhāsakam ।
vaikuṇṭhasyākhilā vedā udgīryante'niśaṁ yataḥ ।। 7 ।।

स्मरेत यामिनीनाथ सहस्रामितकान्तिमत् ।

भवतापापनोदीड्यम् श्रीपतेः मुखपङ्कजम् ॥ ८ ॥

smareta yāminīnātha sahasrāmitakāntimat ।
bhavatāpāpanodīḍyam śrīpateḥ mukhapaṅkajam ।। 8 ।।

पूर्णानन्यसुखोद्भासिं अन्दस्मितमधीशितुः ।

गोविन्दस्य सदा चिन्त्यं नित्यानन्दपदप्रदम् ॥ ९ ॥

pūrnānanyasukhodbhāsim andasmitamadhīśituḥ ।
govindasya sadā cintyaṁ nityānandapadapradam ।। 9 ।।

स्मारामि भवसन्ताप हानिदामृतसागरम् ।

पूर्णानन्दस्य रामस्य सानुरागावलोकनम् ॥ १० ॥

smārāmi bhavasantāpa hānidāmṛtasāgaram ।

pūrnānandasya rāmasya sānurāgāvalokanam || 10 ||

ध्यायेदजस्रमीशस्य पद्मजादिप्रतीक्षितम् ।

भ्रूभङ्गं पारमेष्ठ्यादि पददायि विमुक्तिदम् ॥ ११ ॥

dhyāyedajasramīśasya padmajādipratīkṣitam |
bhrūbhaṅgaṁ pārameṣṭhyādi padadāyi vimuktidam || 11 ||

सन्ततं चिन्तयेऽनन्तं अन्तकाले विशेषतः ।

नैवोदापुः गृणन्तोऽन्तं यद्गुणानां अजादयः ॥ १२ ॥

santataṁ cintaye'nantam antakāle viśeṣataḥ |
naivodāpuḥ gṛṇanto'ntaṁ yadguṇānām ajādayaḥ || 12 ||

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं

|| iti śrīmadānandatīrthabhagavatpādācārya viracitaṁ

द्वादश स्तोत्रेषु प्रथम स्तोत्रं सम्पूर्णम् ॥

dvādaśa stotreṣu prathama stotraṁ sampūrṇam ||

## अथ द्वितीयस्तोत्रम्

atha dvitīyastotram

स्वजनोदधिसंवृद्धि पूर्णचन्द्रो गुणार्णवः ।

अमन्दानन्द सान्द्रो नः सदाव्यादिन्दिरापतिः ॥ १ ॥

svajanodadhisaṁvṛddhi pūrṇacandro guṇārṇavaḥ |
amandānanda sāndro naḥ sadāvyādindirāpatiḥ || 1 ||

रमाचकोरीविधवे दुष्ट दर्पोदवह्नये ।

सत्पान्थजनगेहाय नमो नारायणाय ते ॥ २ ॥

ramācakorīvidhave duṣṭa darpodavahnaye |
satpānthajanagehāya namo nārāyaṇāya te || 2 ||

चिदचिद्भेदमखिलं विधायाधाय भुञ्जते ।

अव्याकृतगृहस्थाय रमाप्रणयिने नमः ॥ ३ ॥

cidacidbhedamakhilaṁ vidhāyādhāya bhuñjate |
avyākṛtagṛhasthāya ramāpraṇayine namaḥ || 3 ||

अमन्दगुणसारोऽपि मन्दहासेन वीक्षितः ।

नित्यमिन्दिरयाऽनन्दसान्द्रो यो नौमि तं हरिम् ॥ ४ ॥

amandaguṇasāro'pi mandahāsena vīkṣitaḥ |
nityamindirayā'nandasāndro yo naumi taṁ harim || 4 ||

वशी वशो न   कस्यापि योऽजितो विजिताखिलः ।

सर्वकर्ता न क्रियते तं नमामि रमापतिम् ॥ ५ ॥

vaśī vaśo na   kasyāpi yo'jito vijitākhilaḥ |
sarvakartā na kriyate taṁ namāmi ramāpatim || 5 ||

अगुणाय गुणोद्रेक स्वरूपायादि कारिणे ।

विदारितारिसङ्घाय वासुदेवाय ते नमः ॥ ६ ॥

aguṇāya guṇodreka svarūpāyādi kāriṇe ।
vidāritārisaṅghāya vāsudevāya te namaḥ ।। 6 ।।

आदिदेवाय देवानां पतये सादितारये ।

अनाद्यज्ञानपराय नमः पारावराश्रय ॥ ७ ॥

ādidevāya devānāṁ pataye sāditāraye ।
anādyajñānaparāya namaḥ pārāvarāśraya ।। 7 ।।

अजाय जनयित्रेऽस्य विजिताखिलदानव ।

अजादि पूज्यपादाय नमस्ते गरुडध्वज ॥ ८ ॥

ajāya janayitre'sya vijitākhiladānava ।
ajādi pūjyapādāya namaste garuḍadhvaja ।। 8 ।।

इन्दिरामन्दसान्द्राग्य कटाक्षप्रेक्षितात्मने ।

अस्मदिष्टैक कार्याय पूर्णाय हरये नमः ॥ ९ ॥

indirāmandasāndrāgya kaṭākṣaprekṣitātmane ।
asmadiṣṭaika kāryāya pūrṇāya haraye namaḥ ।। 9 ।।

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं

द्वादशस्तोत्रेषु द्वितीयस्तोत्रम् सम्पूर्णम् ॥

।। iti śrīmadānandatīrthabhagavatpādācārya viracitaṁ
dvādaśastotreṣu dvitīyastotram sampūrṇam ।।

## अथ तृतीयस्तोत्रम्

atha tṛtīyastotram

कुरु भुंक्ष्व च कर्म निजं नियतं हरिपाद विनम्रधिया सततम् ।

हरिरेव परो हरिरेव गुरुर्हरिरेव जगत्पितृमातृगतिः ॥ १ ॥

kuru bhuṅkṣva ca karma nijaṁ niyataṁ haripāda vinamradhiyā satatam ।
harireva paro harireva gururharireva jagatpitṛmātṛgatiḥ ।। 1 ।।

न ततोऽस्त्यपरं जगतीड्यतमं परमात्परतः पुरुषोत्तमतः ।

तदलं बहुलोकविचिन्तनया प्रवणं कुरु मानसमीशपदे ॥ २ ॥

na tato'styaparaṁ jagatīḍyatamaṁ paramātparataḥ puruṣottamataḥ ।
tadalaṁ bahulokavicintanayā pravaṇaṁ kuru mānasamīśapade ।। 2 ।।

यततोऽपि हरेः पद संस्मरणे सकलं ह्यघमाशु लयं व्रजति ।

स्मरतस्तु विमुक्ति पदं परमः स्पुटमेष्यति तत्किमपाक्रियते ॥ ३ ॥

yatato'pi hareḥ pada saṁsmaraṇe sakalaṁ hyaghamāśu layaṁ vrajati ।
smaratastu vimukti padaṁ paramaḥ spuṭameṣyati tatkimapākriyate ।। 3 ।।

श्रुणुतामलसत्यवचः परमं शपथेरितमुच्छ्रित बाहु युगम् ।

न हरेः परमो न हरेः सदृशः परमः स तु सर्वचिदात्मगणात् ॥ ४ ॥

śruṇutāmalasatyavacaḥ paramaṁ śapatheritamucchrita bāhu yugam ।
na hareḥ paramo na hareḥ sadṛśaḥ paramaḥ sa tu sarvacidātmagaṇāt ।। 4 ।।

यदि नाम परो न भवेत्स त हरिः कथमस्य वशे जगदेतदभूत् ।

यदि नाम न तस्य वशे सकलं कथमेव तु नित्यसुखं न भवेत् ॥ ५ ॥

yadi nāma paro na bhavetsa (ta) hariḥ kathamasya vaśe jagadetadabhūt ।
yadi nāma na tasya vaśe sakalaṁ kathameva tu nityasukhaṁ na bhavet ।। 5 ।।

न च कर्मविमामलकालगुण प्रभृतीशमचित्तनुतद्धियतः ।

चिदचित्तनुसर्वमसो तु हरिर्यमयेदिति वैदिकमस्तिवचः ॥ ६ ॥

na ca karmavimāmalakālaguṇa prabhṛtīśamacittanutaddhiyataḥ |
cidacittanusarvamasou tu hariryamayediti vaidikamastivacaḥ || 6 ||

व्यवहारभिदापि गुरोर्जगतां न तु चित्तगता स हि चोद्य परम् ।

बहवः पुरुषाः पुरुषप्रवरो हरिरित्यवदत्स्वय मेव हरिः ॥ ७ ॥

vyavahārabhidāpi gurorjagatāṁ na tu cittagatā sa hi codya param |
bahavaḥ puruṣāḥ puruṣapravaro haririty avadatsvaya meva hariḥ || 7 ||

चतुराननपूर्वविमुक्तगणा हरिमेत्यतु पूर्ववदेव सदा ।

नियतोच्छ विनीचतयैव निजां स्थितिमापुरिति स्मपरं वचनम् ॥ ८ ॥

caturānanapūrvavimuktagaṇā harimetyatu pūrvadeva sadā |
niyatoccha vinīcatayaiva nijāṁ sthitimāpuriti smaparaṁ vacanam || 8 ||

आनंदतीर्थसन्नाम्ना पूर्णप्रज्ञाभिदायुजा ।

कृतं हर्यष्टकं भक्त्यापठतः प्रीयते हरिः ॥ ९ ॥

ānandatīrthasannāmnā pūrṇaprajñābhidāyujā |
kṛtaṁ haryaṣṭakaṁ bhaktyāpaṭhataḥ prīyate hariḥ || 9 ||

॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्य विरचितं

द्वादशस्तोत्रेषु तृतीयस्तोत्रं संपूर्णं ॥

|| iti śrīmadānandatīrthabhagavatpādācārya viracitaṁ
dvādaśastotreṣu tṛtīyastotraṁ sampūrṇaṁ ||

## अथ चतुर्थस्तोत्रम्

atha caturthastotram

निजपूर्ण सुखामितबोधतनुः परशक्तिरनन्त गुणः परमः ।

अजरामरणः सकलार्तिहरः कमलापति रीड्यतमोवतुः नः ॥ १ ॥

nijapūrṇa sukhāmitabodhatanuḥ paraśaktirananta guṇaḥ paramaḥ ।
ajarāmaraṇaḥ sakalārtiharaḥ kamalāpati rīḍyatamovatuḥ naḥ ।। 1 ।।

यदसुप्तिगतो पि हरिः सुखवान् सुखरूपिण माहुरतो निगमाः ।

स्व मतिप्रभवं जगदस्य यतःपरभोधतनुंच ततःखपतिम् ॥ २ ॥

yadasuptigato pi hariḥ su<u>kh</u>avān sukharūpiṇa māhurato nigamāḥ ।
sva matiprabhavaṁ jagadasya yataḥparabhodhatanuñca tataḥkhapatim ।। 2 ।।

बहुचित्रजगद्बहुधारकरणात्पर शक्तिरनंतगुणः परमः ।

सुखरूपममुष्य पदं परमं   स्मरतस्तु भविष्यति तत्सततम् ॥ ३ ॥

bahucitrajagadbahudhārakaraṇātpara śaktiranantaguṇaḥ paramaḥ ।
sukharūpamamuṣya padaṁ paramaṁ   smaratastu bhaviṣyati tatsatatam ।। 3 ।।

स्मरणे हि परेशितुरस्य विभोर्मलिनानि मनांसि कुतः करणम् ।

विमलं हि पदं परमं स्वरतं तरुणार्क सवर्णमजस्य हरेः ॥ ४ ॥

smaraṇe hi pareśiturasya vibhormalināni manāṁsi kutaḥ karaṇam ।
vimalaṁ hi padaṁ paramaṁ svarataṁ taruṇārka savarṇamajasya hareḥ ।। 4 ।।

विमलैः शृतिशाणनिशाततमैः सुमनोसिभिराशु निहत्य दृडम् ।

बलिनं निजवैरिणमात्म तमोभिदमीशमनंत मुपास्व हरिम् ॥ ५ ॥

vimalaiḥ śṛtiśāṇaniśātatamaiḥ sumanosibhirāśu nihatya dṛḍam ।
balinaṁ nijavairiṇamātma tamobhidamīśamananta mupāsva harim ।। 5 ।।

स हि विश्वसृजो विभुशंभु पुरन्दरसूर्यमुखान परानमरान्।

सृजतीड्य तमोऽवति हंति निजं पदमापयति प्रणतान् स्वधिया ॥ ६ ॥

sa hi viśvasṛjo vibhuśambhu purandarasūryamukhāna parānamarān |
sṛjatīḍya tamo'vati hanti nijaṁ padamāpayati praṇatān svadhiyā || 6 ||

परमोऽपि रमेशितुरस्य समो न हि कश्चिदभून्न भविष्यति च।

क्वचिदद्यतनोऽपि न पूर्ण सदा गणीतेड्य गुणानुभवैकतनोः॥ ७ ॥

paramo'pi rameśiturasya samo na hi kaścidabhūnna bhaviṣyati ca |
kvacidadyatano'pi na pūrṇa sadā gaṇīteḍya guṇānubhavaikatanoḥ || 7 ||

इति देवतरस्य हरेः स्तवनं कृतवान् मुनिरुत्तममादरतः।

सुखतीर्थ पदाभिहितः पठतस्तदिदं भवति ध्रुवमुच्छ सुखम्॥ ८ ॥

iti devatarasya hareḥ stavanaṁ kṛtavān muniruttamamādarataḥ |
sukhatīrtha padābhihitaḥ paṭhatastadidaṁ bhavati dhṛvamuccha sukham || 8 ||

इति श्रीमदानंदतीर्थभगवत्पादाचार्य विरचितं

द्वादशस्तोत्रेषु चथुर्थस्तोत्रं संपूर्णं

iti śrīmadānandatīrthabhagavatpādācārya viracitaṁ
dvādaśastotreṣu cathurthastotraṁ sampūrṇaṁ

## अथ पंचमस्तोत्रम्

atha pañcamastotram

### वासुदेवापरिमेय सुधामन् शुद्ध सदोदित सुन्दरीकांत ।

### धराधरधारण वेधुरधर्तः सौधृतिदीधिति वेधृविधातः ॥ १ ॥

vāsudevāparimeya sudhāman śuddha sadodita sundarīkānta |
dharādharadhāraṇa vedhuradhartaḥ saudhṛtidīdhiti vedhṛvidhātaḥ || 1 ||

### अधिकबन्धं रन्धय बोधाछिंदि विधानं बन्धुरमद्धा ।

### केशव केशव शासक वन्दे पाशधरार्चित शूरवरेश ॥ २ ॥

adhikabandhaṁ randhaya bodhāchindi vidhānaṁ bandhuramaddhā |
keśava keśava śāsaka vande pāśadharārcita śūravareśa || 2 ||

### नारायणामलकारण वंदे कारण कारण पूर्ण वरेण्य ।

### माधव माधव साधक वंदे बाधक बोधक शुद्ध समाधे ॥ ३ ॥

nārāyaṇāmalakāraṇa vande kāraṇa kāraṇa pūrṇa vareṇya |
mādhava mādhava sādhaka vande bādhaka bodhaka śuddha samādhe || 3 ||

### गोविन्द गोविन्द पुरन्दर वन्दे स्कन्दसनन्दनवन्दितपाद ।

### विष्णोसृजिष्णो ग्रसिष्णो विवंदे कृष्ण सुदुष्ण वधिष्णो सुधृष्णो ॥ ४ ॥

govinda govinda purandara vande skandasanandanavanditapāda |
viṣṇosṛjiṣṇo grasiṣṇo vivande kṛṣṇa suduṣṇa vadhiṣṇo sudhṛṣṇo || 4 ||

### मधुसूदन दानव सादनवन्दे दैवतमोदित वेदितपाद ।

### त्रिविक्रम निष्क्रम विक्रम वन्दे सुक्रम सन्क्रमहुङ्कृतवक्त्र ॥ ५ ॥

madhusūdana dānava sādanavande daivatamodita veditapāda |
trivikrama niṣkrama vikrama vande sukrama sankramahuṅkṛtavaktra || 5 ||

वामन वामन भामन वन्दे सामन सीमन सामन सानो ।

श्रीधर श्रीधर शंधर वंदे भूधर वार्धर कन्दरधारिन् ॥ ६ ॥

vāmana vāmana bhāmana vande sāmana sīmana sāmana sāno |
śrīdhara śrīdhara śandhara vande bhūdhara vārdhara kandaradhārin || 6 ||

हृषिकेश सुकेश परेश विवन्दे शरणेश कलेश बलेश सुखेश ।

पद्मनाभ शुभोद्भव वन्दे संभृत लोकभराभर भूरे ॥ ७ ॥

hṛṣikeśa sukeśa pareśa vivande śaraṇeśa kaleśa baleśa sukheśa |
padmanābha śubhodbhava vande sambhṛta lokabharābhara bhūre || 7 ||

दामोदर दूरतरान्तर वन्देदारितपारगपार परस्मात् ॥ ८ ॥

dāmodara dūratarāntara vandedāritapāragapāra parasmāt || 8 ||

आनन्द सुतीर्थ मुनीन्द्रकृता हरिगीतिरियं परमादरतः ।

परलोक विलोकन सूर्यनिभा हरिभक्ति विवर्धन शौण्डतमा ॥ ९ ॥

ānanda sutīrtha munīndrakṛtā harigītiriyaṁ paramādarataḥ |
paraloka vilokana sūryanibhā haribhakti vivardhana śauṇḍatamā || 9 ||

इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं

द्वादशस्तोत्रेषु पंचमस्तोत्रं संपूर्णं

iti śrīmadānandatīrthabhagavatpādācārya viracitaṁ
dvādaśastotreṣu pañcamastotraṁ sampūrṇaṁ

## अथ षष्टस्तोत्रम्

atha ṣaṣṭastotram

देवकिनन्दन नन्दकुमार वृन्दावनान्चन गोकुल चन्द्र ।

कन्दफलाशन सुन्दररूप नन्दित गोकुल वन्दितपाद ॥ १ ॥

devakinandana nandakumāra vṛndāvanāncana gokula candra |
kandaphalāśana sundararūpa nandita gokula vanditapāda || 1 ||

इन्द्रसुतावकनन्दन हस्त चन्दनचर्चित सुन्दरिनाथ ।

इन्दीवरोदर दलनयन मन्दरधारिन् गोविन्द वन्दे ॥ २ ॥

indrasutāvakanandana hasta candanacarcita sundarinātha |
indīvarodara dalanayana mandaradhārin govinda vande || 2 ||

चन्द्रशतानन कुन्दसुहास नन्दितदैवतानंद सुपूर्ण ।

मत्स्यकरूपलयोद विहारिन् वेदविनेतृ चतुर्मुख वन्द्य ॥ ३ ॥

candraśatānana kundasuhāsa nanditadaivatānanda supūrṇa |
matsyakarūpalayoda vihārin vedavinetṛ caturmukha vandya || 3 ||

कूर्मस्वरूपक मन्दरधारिन् लोकविधारक देववरेण्य ।

सूकररूपक दानवशत्रो भूमिविधारक यज्ञवराङ्ग ॥ ४ ॥

kūrmasvarūpaka mandaradhārin lokavidhāraka devavareṇya |
sūkararūpaka dānavaśatro bhūmividhāraka yajñavarāṅga || 4 ||

देव नृसिंह हिरण्यकशत्रो सर्वभयान्तक दैवतबन्धो ।

वामन वामन माणववेष दैत्यवरान्तक कारण रूप ॥ ५ ॥

deva nṛsiṁha hiraṇyakaśatro sarvabhayāntaka daivatabandho |
vāmana vāmana māṇavaveṣa daityavarāntaka kāraṇa rūpa || 5 ||

राम भृगूद्वह सूर्जितदीप्ते क्षत्रकुलान्तक शम्भुवरेण्य ।

राघव राघव राक्षस शत्रो मारुति वल्लभ जानकी कान्त ॥ ६ ॥

rāma bhṛgūdvaha sūrjitadīpte kṣatrakulāntaka śambhuvareṇya ।
rāghava rāghava rākṣasa śatro māruti vallabha jānakī kānta ।। 6 ।।

देवकि नन्दन सुन्दररूप रुक्मिणि वल्लभ पाण्डव बन्धो ।

दैत्य विमोहक नित्य सखादे देवसु बोधक बुद्ध स्वरूप ॥ ७ ॥

devaki nandana sundararūpa rukmiṇi vallabha pāṇḍava bandho ।
daitya vimohaka nitya sakhāde devasu bodhaka buddha svarūpa ।। 7 ।।

दुष्ट कुलान्तक कल्किस्वरूप धर्म विवर्धन मूलयुगादे ।

नारायणामलकारण मूर्ते पूर्ण गुणार्णव नित्य सुबोध ॥ ८ ॥

duṣṭa kulāntaka kalkisvarūpa dharma vivardhana mūlayugāde ।
nārāyaṇāmalakāraṇa mūrte pūrṇa guṇārṇava nitya subodha ।। 8 ।।

सुखतीर्थ मुनींद्र कृपा हरिगाथा पापहराशुभनित्य सुखार्थ

sukhatīrtha munīndra kṛpā harigāthā pāpaharāśubhanitya sukhārtha

॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्य विरचितं

द्वादशस्तोत्रेषु षष्टस्तोत्रं सम्पूर्णं ॥

।। iti śrīmadānandatīrthabhagavatpādācārya viracitaṁ
dvādaśastotreṣu ṣaṣṭastotraṁ sampūrṇaṁ ।।

## अथ सप्तमस्तोत्रम्

atha saptamastotram

विश्वस्थिति प्रळय सर्गमहाविभूति वृत्तिप्रकाशनिय मावृति बन्धमोक्षाः ।

यस्या अपाङ्गलवमात्रत ऊर्जिता सा श्रीः यत्कटाक्ष बलवत्यजितं नमामि ॥ १ ॥

viśvasthiti praḻaya sargamahāvibhūti vṛttiprakāśaniya māvṛti bandhamokṣāḥ |
yasyā apāṅgalavamātrata ūrjitā sā śrīḥ yatkaṭākṣa balavatyajitaṁ namāmi || 1 ||

ब्रह्मेशशक्ररविधर्मशशाङ्क पूर्वगीर्वाण सन्ततिरियं यदपाङ्गलेशं ।

आश्रित्य विश्वविजयं विसृजत्यचिन्त्या श्रीः यत्कटाक्ष बलवत्यजितं नमामि ॥ २ ॥

brahmeśaśakraravidharmaśaśāṅka pūrvagīrvāṇa santatiriyaṁ yadapāṅgaleśaṁ |
āśritya viśvavijayaṁ visṛjatyacintyā śrīḥ yatkaṭākṣa balavatyajitaṁ namāmi || 2 ||

धर्मार्थकामसुमति प्रचयाद्य शेष सन्मन्गलं विदधतेयदपाङ्गलेशं ।

आश्रित्य तत्प्रणतसत्प्रणता अपीड्याः श्रीः यत्कटाक्ष बलवत्यजितं नमामि ॥ ३ ॥

dharmārthakāmasumati pracayādya śeṣa sanmangalaṁ vidadhateyadapāṅgaleśaṁ |
āśritya tatpraṇatasatpraṇatā apīḍyāḥ śrīḥ yatkaṭākṣa balavatyajitaṁ namāmi || 3 ||

षड्वर्ग निग्रहनिरस्तसमस्तदोषाध्यायन्ति विष्णु मृषुयोयदपाङ्गलेशं ।

आश्रित्य यानपि समेत्य न याति दुःखं श्रीः यत्कटाक्ष बलवत्यजितं नमामि ॥ ४ ॥

ṣaḍvarga nigrahanirastasamastadoṣādhyāyanti viṣṇu mṛṣuyoyadapāṅgaleśaṁ |
āśritya yānapi sametya na yāti duḥkhaṁ śrīḥ yatkaṭākṣa balavatyajitaṁ namāmi || 4 ||

शेषाहिवैरिशिवशक्रमनुप्रधानचित्रोरुकर्मरचनं यदपाङ्गलेशं ।

आश्रित्य विश्वमखिलं विदधाति धाता श्रीः यत्कटाक्ष बलवत्यजितं नमामि ॥ ५ ॥

śeṣāhivairiśivaśakramanupradhānacitrorukarmaracanaṁ yadapāṅgaleśaṁ |
āśritya viśvamakhilaṁ vidadhāti dhātā śrīḥ yatkaṭākṣa balavatyajitaṁ namāmi || 5 ||

शक्रोग्रदीधिति हिमाकरसूर्यसूनुपूर्वं निहत्य निखिलं यदपाङ्गलेशम्।

आश्रित्य नृत्यति शिवः प्रकटोरु शक्तिः श्रीः यत्कटाक्ष बलवत्यजितं नमामि॥ ६॥

śakrogradīdhiti himākarasūryasūnupūrvaṁ nihatya nikhilaṁ yadapāṅgaleśam |
āśritya nṛtyati śivaḥ prakaṭoru śaktiḥ śrīḥ yatkaṭākṣa balavatyajitaṁ namāmi || 6 ||

तत्पाद पङ्कज महासनतामवाप शर्वादिवन्द्य चरणो यदपाङ्गलेशम्।

आश्रित्य नागपतिरन्य सुरैर्दुरापां श्रीः यत्कटाक्ष बलवत्यजितं नमामि॥ ७॥

tatpāda paṅkaja mahāsanatāmavāpa śarvādivandya caraṇo yadapāṅgaleśam |
āśritya nāgapatiranya surairdurāpāṁ śrīḥ yatkaṭākṣa balavatyajitaṁ namāmi || 7 ||

नागारिरुग्रबल पौरुष आप विष्णु वाहत्वमुत्त मजवो यदपाङ्गलेशम्।

आश्रित्य शक्रमुखदेवगणै रचिन्त्यं श्रीः यत्कटाक्ष बलवत्यजितं नमामि॥ ८॥

nāgārirugrabala pauruṣa āpa viṣṇu vāhatvamutta majavo yadapāṅgaleśam |
āśritya śakramukhadevagaṇai racintyaṁ śrīḥ yatkaṭākṣa balavatyajitaṁ namāmi || 8 ||

आनन्द तीर्थमुनिसन्मुखपंकजोत्थं साक्षाद्रमा हरिमनः प्रियमुत्तमार्थम्।

भक्त्यापठत्यजितमात्मनि सन्निधाय यःस्तोत्रमेतभियाति तयोरभीष्टम्॥ ९॥

ānanda tīrthamunisanmukhapaṅkajotthaṁ sākṣādramā harimanaḥ priyamuttamārtham
|
bhaktyāpaṭhatyajitamātmani sannidhāya yaḥstotrametabhiyāti tayorabhīṣṭam || 9 ||

॥ इति श्रीमदानंदतीर्थभगवत्पादाचार्य विरचितं

द्वादशस्तोत्रेषु सप्तमस्तोत्रं सम्पूर्णं॥

|| iti śrīmadānandatīrthabhagavatpādācārya viracitaṁ
dvādaśastotreṣu saptamastotraṁ sampūrṇaṁ ||

## अथ अष्टमस्तोत्रम्

atha aṣṭamastotram

वन्दिताशेषवन्द्योरुवृन्दारकं चन्दनाचर्चितो दारपीनांसकम् ।

इन्दिराचन्चलापाङ्गनीराजितं मन्दरोद्धारि वृत्तोद्भुजाभोगिनं ।

प्रीणयामो वासुदेवं देवतामण्डला खण्डमण्डनं प्रीणयामो वासुदेवं ॥ १ ॥

vanditāśeṣavandyoruvṛndārakaṁ candanācar̆cito dārapīnāṁsakam |
indirācancalāpāṅganīrājitaṁ mandaroddhāri vṛttodbhujābhoginaṁ |
prīṇayāmo vāsudevaṁ devatāmaṇḍalā khaṇḍamaṇḍanaṁ prīṇayāmo vāsudevaṁ || 1 ||

सृष्टिसंहारलीलाविलासाततं   पुष्टषाड्गुण्य सद्विग्रहोल्लासिनम् ।

दुष्ट निष्येषसंहारकर्मोद्यतं हृष्टपुष्टानुतिशिष्ट प्रजासंश्रयं ।

प्रीणयामो वासुदेवं देवतामण्डला खण्डमण्डनं प्रीणयामो वासुदेवं ॥ २ ।

sṛṣṭisaṁhāralīlāvilāsātataṁ   puṣṭaṣāḍguṇya sadvigrahollāsinam |
duṣṭa niṣyeṣasaṁhārakarmodyataṁ hṛṣṭapuṣṭānu(ti)śiṣṭa prajāsaṁśrayaṁ |
prīṇayāmo vāsudevaṁ devatāmaṇḍalā khaṇḍamaṇḍanaṁ prīṇayāmo vāsudevaṁ || 2 |

उन्नतप्रार्थिताशेषसंसाधकं सन्नतालोकिका नन्दद श्रीपदम् ।

भिन्नकर्माशयप्राणिसम्प्रेरकंतन्नकिंनेति विद्वत्सु मिमांसितं ।

प्रीणयामो वासुदेवं देवतामण्डला खण्डमण्डनं प्रीणयामो वासुदेवं ॥ ३ ॥

unnataprārthitāśeṣasaṁsādhakaṁ sannatāloukikā nandada śrīpadam |
bhinnakarmāśayaprāṇisamprerakantannakinneti vidvatsu mimāṁsitaṁ |
prīṇayāmo vāsudevaṁ devatāmaṇḍalā khaṇḍamaṇḍanaṁ prīṇayāmo vāsudevaṁ || 3 ||

विप्रमुख्यैः सदावेदवादोन्मुखैः सुप्रतापैः क्षीतिशेश्वरैष्चार्चितं ।

अप्रतर्क्योरुसंविद्गुणं निर्मलं सप्रकाशाजरानन्द रूपंपरं ।

प्रीणयामो वासुदेवं देवतामण्डला खण्डमण्डनं प्रीणयामो वासुदेवं ॥ ४ ॥

vipramukhyaiḥ sadāvedavādonmukhaiḥ supratāpaiḥ kṣītiśeśvaraiṣcārcitaṁ |
apratarkyorusaṁvidguṇaṁ nirmalaṁ saprakāśājarānanda rūpamparaṁ |
prīṇayāmo vāsudevaṁ devatāmaṇḍalā khaṇḍamaṇḍanaṁ prīṇayāmo vāsudevaṁ || 4 ||

अत्ययो यस्यकेनापिनक्वापिहिप्रत्यतो यद्गुणेषूत्तमानांपरः ।

सत्यसङ्कल्प एको वरोण्यो वशी मत्यनूनैः सदा वेदवादोदितः ।

प्रीणयामो वासुदेवं देवतामण्डला खण्डमण्डनं प्रीणयामो वासुदेवं ॥ ५ ॥

atyayo yasyakenāpinakvāpihipratyato yadguṇeṣūttamānāmparaḥ |
satyasaṅkalpa eko varoṇyo vaśī matyanūnaiḥ sadā vedavādoditaḥ |
prīṇayāmo vāsudevaṁ devatāmaṇḍalā khaṇḍamaṇḍanaṁ prīṇayāmo vāsudevaṁ || 5 ||

पश्यतां दुःखसन्ताननिर्मूलनं दृश्यतां दृश्यतामित्य जेशार्चितम् ।

नश्यतां दूरगं सर्वदाप्यात्मगं पश्यतां स्वेच्छया सज्जनेष्वागतं ।

प्रीणयामो वासुदेवं देवतामण्डला खण्डमण्डनं प्रीणयामो वासुदेवं ॥ ६ ॥

paśyatāṁ duḥkhasantānanirmūlanaṁ dṛśyatāṁ dṛśyatāmitya jeśārcitam |
naśyatāṁ dūragaṁ sarvadāpyātmagaṁ paśyatāṁ svecchayā sajjaneṣvāgataṁ |
prīṇayāmo vāsudevaṁ devatāmaṇḍalā khaṇḍamaṇḍanaṁ prīṇayāmo vāsudevaṁ || 6 ||

अग्रजं यः ससर्जाजमग्र्याकृतिं विग्रहोयस्य सर्वेगुणा एव हि ।

उग्र आद्योऽपि यस्यात्मजाग्र्यात्मजः सद्गृहीतः सदायः परंदैवतम् ।

प्रीणयामो वासुदेवं देवतामण्डला खण्डमण्डनं प्रीणयामो वासुदेवं ॥ ७ ॥

agrajaṁ yaḥ sasarjājamagryākṛtiṁ vigrahoyasya sarveguṇā eva hi |

ugra ādyo'pi yasyātmajāgryātmajaḥ sadgṛhītaḥ sadāyaḥ parandaivatam |
prīṇayāmo vāsudevaṁ devatāmaṇḍalā khaṇḍamaṇḍanaṁ prīṇayāmo vāsudevaṁ || 7 ||

अच्युतो यो गुणैर्नित्यमेवाखिलैः प्रच्युतोऽशेष दोषैः सदापूर्तित ।

उच्यते सर्ववेदोरु वादैरजः स्वर्जितो ब्रह्मरुद्रेन्द्र पूर्वैस्सदा ।

प्रीणयामो वासुदेवं देवतामण्डला खण्डमण्डनं प्रीणयामो वासुदेवं ॥ ८ ॥

acyuto yo guṇairnityamevākhilaiḥ pracyuto'śeṣa doṣaiḥ sadāpūrtita |
ucyate sarvavedoru vādairajaḥ svarjito brahmarudrendra pūrvaissadā |
prīṇayāmo vāsudevaṁ devatāmaṇḍalā khaṇḍamaṇḍanaṁ prīṇayāmo vāsudevaṁ || 8 ||

धार्यते येनविश्वं सदाजादिकं वार्यतेशेषदुःखं निजध्यायिनां ।

पार्यते सर्वमन्यैर्नयत्पार्यते कार्यते चाखिलं सर्वभूतैः सदा ।

प्रीणयामो वासुदेवं देवतामण्डला खण्डमण्डनं प्रीणयामो वासुदेवं ॥ ९ ॥

dhāryate yenaviśvaṁ sadājādikaṁ vāryateśeṣaduḥkhaṁ nijadhyāyināṁ |
pāryate sarvamanyairnayatpāryate kāryate cākhilaṁ sarvabhūtaiḥ sadā |
prīṇayāmo vāsudevaṁ devatāmaṇḍalā khaṇḍamaṇḍanaṁ prīṇayāmo vāsudevaṁ || 9 ||

सर्वपापानि यत्संस्मृतेः सङ्क्षयसर्वदा यान्तिभक्त्याविशुद्धात्मनां ।

शर्वगुर्वादिगीर्वाण संस्थानदः कुर्वते कर्म यत्प्रीतये सज्जनाः ।

प्रीणयामो वासुदेवं देवतामण्डला खण्डमण्डनं प्रीणयामो वासुदेवं ॥ १० ॥

sarvapāpāni yatsaṁsmṛteḥ saṅkṣayasarvadā yāntibhaktyāviśuddhātmanāṁ |
śarvagurvādigīrvāṇa saṁsthānadaḥ kurvate karma yatprītaye sajjanāḥ |
prīṇayāmo vāsudevaṁ devatāmaṇḍalā khaṇḍamaṇḍanaṁ prīṇayāmo vāsudevaṁ || 10 ||

अक्षयं कर्मयस्मिन् परेस्वर्पितंऽप्रक्ष यं यान्ति दुःखानिःयन्नामत ।

अक्षरोयोऽजरः सर्वदैवामृतः कुक्षिगं यस्य विश्वं सदाजादिकम् ।

प्रीणयामो वासुदेवं देवतामण्डला खण्डमण्डनं प्रीणयामो वासुदेवं ॥ ११ ॥

akṣayaṁ karmayasmin paresvarpitaṁ'prakṣa yaṁ yānti duḥkhāniḥyannāmata |
akṣaroyo'jaraḥ sarvadaivāmṛtaḥ kukṣigaṁ yasya viśvaṁ sadājādikam |
prīṇayāmo vāsudevaṁ devatāmaṇḍalā khaṇḍamaṇḍanaṁ prīṇayāmo vāsudevaṁ || 11 ||

नन्दितीर्थोरुसन्नामिनो नन्दिनः सन्दधानाः सदानन्ददेवे मतिम् ।

मन्दहासारुणापाङ्ग दत्तोन्नतिं वन्दिता शेषदेवादि वृन्दं सदा ।

प्रीणयामो वासुदेवं देवतामण्डला खण्डमण्डनं प्रीणयामो वासुदेवं ॥ १२ ॥

nanditīrthorusannāmino nandinaḥ sandadhānāḥ sadānandadeve matim |
mandahāsāruṇāpāṅga dattonnatiṁ vanditā śeṣadevādi vṛndaṁ sadā |
prīṇayāmo vāsudevaṁ devatāmaṇḍalā khaṇḍamaṇḍanaṁ prīṇayāmo vāsudevaṁ || 12 ||

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं

द्वादशस्तोत्रेषु अष्टमस्तोत्रं सम्पूर्णं ॥

|| iti śrīmadānandatīrthabhagavatpādācārya viracitaṁ
dvādaśastotreṣu aṣṭamastotraṁ sampūrṇaṁ ||

## अथ नवमस्तोत्रम्

atha navamastotram

अतिमत तमोगिरिसमितिविभेदन पितामहभूतिद गुणगणनिलय ।

शुभतमकथाशय परमसदोदित जगदेककारण राम रमारमण ॥ १ ॥

atimata tamogirisamitivibhedana pitāmahabhūtida guṇagaṇanilaya |
śubhatamakathāśaya paramasadodita jagadekakāraṇa rāma ramāramaṇa || 1 ||

विधिभवमुख सुरसतत सुवन्दित रमा मनोवल्लभ भव मम शरणम् ।

शुभतमकथाशय परमसदोदित जगदेककारण राम रमारमण ॥ २ ॥

vidhibhavamukha surasatata suvandita ramā manovallabha bhava mama śaraṇam |
śubhatamakathāśaya paramasadodita jagadekakāraṇa rāma ramāramaṇa || 2 ||

अगणितगुणगण मयशरीर हे विगतगुणेतर भवमम शरणम् ।

शुभतमकथाशय परमसदोदित जगदेककारण राम रमारमण ॥ ३ ॥

agaṇitaguṇagaṇa mayaśarīra he vigataguṇetara bhavamama śaraṇam |
śubhatamakathāśaya paramasadodita jagadekakāraṇa rāma ramāramaṇa || 3 ||

अपरिमित सुखनिधिविमलसुदेह हे विगतसुखेतर भव मम शरणम् ।

शुभतमकथाशय परमसदोदित जगदेककारण राम रमारमण ॥ ४ ॥

aparimita sukhanidhivimalasudeha he vigatasukhetara bhava mama śaraṇam |
śubhatamakathāśaya paramasadodita jagadekakāraṇa rāma ramāramaṇa || 4 ||

प्रचलितलयजलविहरण शाश्वतसुखमयमीन हे भव मम शरणम् ।

शुभतमकथाशय परमसदोदित जगदेककारण राम रमारमण ॥ ५ ॥

pracalitalayajalaviharaṇa śāśvatasukhamayamīna he bhava mama śaraṇam |
śubhatamakathāśaya paramasadodita jagadekakāraṇa rāma ramāramaṇa || 5 ||

सुरदितिज सुबलविलुलितमन्दरधरपर वर कूर्म हे भव मम शरणम्।

शुभतमकथाशय परमसदोदित जगदेककारण राम रमारमण ॥ ६ ॥

suraditija subalavilulitamandaradharapara (vara) kūrma he bhava mama śaraṇam |
śubhatamakathāśaya paramasadodita jagadekakāraṇa rāma ramāramaṇa || 6 ||

सगिरिवरधरातलवह सुसूकर परमविबोध हे भव मम शरणम्।

शुभतमकथाशय परमसदोदित जगदेककारण राम रमारमण ॥ ७ ॥

sagirivaradharātalavaha susūkara paramavibodha he bhava mama śaraṇam |
śubhatamakathāśaya paramasadodita jagadekakāraṇa rāma ramāramaṇa || 7 ||

अतिबलदितिसुतहृदयविभेदन जयनृहरेऽमल भव मम शरणम्।

शुभतमकथाशय परमसदोदित जगदेककारण राम रमारमण ॥ ८ ॥

atibaladitisutahṛdayavibhedana jayanṛhare'mala bhava mama śaraṇam |
śubhatamakathāśaya paramasadodita jagadekakāraṇa rāma ramāramaṇa || 8 ||

बलिमुखदितिसुतविजयविनाशन जगदवनाजित भव मम शरणम्।

शुभतमकथाशय परमसदोदित जगदेककारण राम रमारमण ॥ ९ ॥

balimukhaditisutavijayavināśana jagadavanājita bhava mama śaraṇam |
śubhatamakathāśaya paramasadodita jagadekakāraṇa rāma ramāramaṇa || 9 ||

अविजितकुनृपतिसमितिविखण्डन रमावर वीरप भव मम शरणम्।

शुभतमकथाशय परमसदोदित जगदेककारण राम रमारमण ॥ १० ॥

avijitakunṛpatisamitivikhaṇḍana ramāvara vīrapa bhava mama śaraṇam |
śubhatamakathāśaya paramasadodita jagadekakāraṇa rāma ramāramaṇa || 10 ||

खरतरनिशिचरदहन परामृत रघुवर मानद भव मम शरणम्।

शुभतमकथाशय परमसदोदित जगदेककारण राम रमारमण ॥ ११ ॥

kharataraniśicaradahana parāmṛta raghuvara mānada bhava mama śaraṇam |
śubhatamakathāśaya paramasadodita jagadekakāraṇa rāma ramāramaṇa || 11 ||

सललिततनुवर वरद महाबल यदुवर पार्थप भव मम शरणम् ।

शुभतमकथाशय परमसदोदित जगदेककारण राम रमारमण ॥ १२ ॥

salalitatanuvara varada mahābala yaduvara pārthapa bhava mama śaraṇam |
śubhatamakathāśaya paramasadodita jagadekakāraṇa rāma ramāramaṇa || 12 ||

दितिसुतविमोहन विमलविबोधन परगुणबुद्ध हे भव मम शरणम् ।

शुभतमकथाशय परमसदोदित जगदेककारण राम रमारमण ॥ १३ ॥

ditisutavimohana vimalavibodhana paraguṇabuddha he bhava mama śaraṇam |
śubhatamakathāśaya paramasadodita jagadekakāraṇa rāma ramāramaṇa || 13 ||

कलिमलहुतवह सुभगमहोत्सव शरणद कल्कीश हे भव मम शरणम् ।

शुभतमकथाशय परमसदोदित जगदेककारण राम रमारमण ॥ १४ ॥

kalimalahutavaha subhagamahotsava śaraṇada kalkīśa he bhava mama śaraṇam |
śubhatamakathāśaya paramasadodita jagadekakāraṇa rāma ramāramaṇa || 14 ||

अखिलजनिविलय परसुख कारण परपुरुषोत्तम भव मम शरणम् ।

शुभतमकथाशय परमसदोदित जगदेककारण राम रमारमण ॥ १५ ॥

akhilajanivilaya parasukha kāraṇa parapuruṣottama bhava mama śaraṇam |
śubhatamakathāśaya paramasadodita jagadekakāraṇa rāma ramāramaṇa || 15 ||

इति तवनुतिवरसततरतेर्भव सुशरणमुरु सुखतीर्थ मुनेर्भगवन् ।

शुभतमकथाशय परमसदोदित जगदेककारण राम रमारमण ॥ १६ ॥

iti tavanutivarasatataraterbhava suśaraṇamuru sukhatīrtha munerbhagavan |

śubhatamakathāśaya paramasadodita jagadekakāraṇa rāma ramāramaṇa || 16 ||

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं

द्वादशस्तोत्रेषु नवमस्तोत्रं सम्पूर्णं ॥

|| iti śrīmadānandatīrthabhagavatpādācārya viracitaṁ
dvādaśastotreṣu navamastotraṁ sampūrṇaṁ ||

## अथ दशमस्तोत्रम्

atha daśamastotram

अव नः श्रीपतिरप्रतिरधिकेशादिभवादे ।

करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ १ ॥

ava naḥ śrīpatirapratiradhikeśādibhavāde ।
karuṇāpūrṇa varaprada caritaṁ jñāpaya me te ।। 1 ।।

सुरवन्ध्यादिप सद्वरभरिता शेषगुणालम् ।

करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ २ ॥

suravandhyādipa sadvarabharitā śeṣaguṇālam ।
karuṇāpūrṇa varaprada caritaṁ jñāpaya me te ।। 2 ।।

सकलध्वान्तविनाशन परमानन्द सुधाहो ।

करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ ३ ॥

sakaladhvāntavināśana paramānanda sudhāho ।
karuṇāpūrṇa varaprada caritaṁ jñāpaya me te ।। 3 ।।

त्रिजगत्पोत सदार्चितशरणाशापतिधातो ।

करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ ४ ॥

trijagatpota sadārcitaśaraṇāśāpatidhāto ।
karuṇāpūrṇa varaprada caritaṁ jñāpaya me te ।। 4 ।।

त्रिगुणातीतविधारक परितो देहि सुभक्तिम् ।

करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ ५ ॥

triguṇātītavidhāraka parito dehi subhaktim ।
karuṇāpūrṇa varaprada caritaṁ jñāpaya me te ।। 5 ।।

शरणं कारणाभावन भव मे तात सदाऽलम् ।

करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ ६ ॥

śaraṇaṁ kāraṇābhāvana bhava me tāta sadā'lam |
karuṇāpūrṇa varaprada caritaṁ jñāpaya me te || 6 ||

मरणप्राणद पालक जगदीशाव सुभक्तिम् ।

करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ ७ ॥

maraṇaprāṇada pālaka jagadīśāva subhaktim |
karuṇāpūrṇa varaprada caritaṁ jñāpaya me te || 7 ||

तरुणादित्य सवर्णकचरणाब्जामलकीर्ते ।

करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ ८ ॥

taruṇāditya savarṇakacaraṇābjāmalakīrte |
karuṇāpūrṇa varaprada caritaṁ jñāpaya me te || 8 ||

सलिलप्रोत्थसरागकमणिवर्णोच्छनखादे ।

करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ ९ ॥

salilaprotthasarāgakamaṇivarṇocchanakhāde |
karuṇāpūrṇa varaprada caritaṁ jñāpaya me te || 9 ||

कजतूणीनिभपावन वरजङ्घामितशक्ते ।

करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ १० ॥

kajatūṇīnibhapāvana varajaṅghāmitaśakte |
karuṇāpūrṇa varaprada caritaṁ jñāpaya me te || 10 ||

इभहस्तपरभशोभनपरमोरु स्थरलमाले ।

करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ ११ ॥

ibhahastaparabhaśobhanaparamoru sthara(la)māle |
karuṇāpūrṇa varaprada caritaṁ jñāpaya me te || 11 ||

असनोत्पुल्लसुपुष्पकसमवर्णावरणान्ते ।

करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ १२ ॥

asanotpullasupuṣpakasamavarṇāvaraṇānte |
karuṇāpūrṇa varaprada caritaṁ jñāpaya me te || 12 ||

शतमोदोद्भवसुन्दरि वरपद्मोत्थितनाभे ।

करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ १३ ॥

śatamododbhavasundari varapadmotthitanābhe |
karuṇāpūrṇa varaprada caritaṁ jñāpaya me te || 13 ||

जगदागूहकपल्लवसमकुक्षे शरणादे ।

करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ १४ ॥

jagadāgūhakapallavasamakukṣe śaraṇāde |
karuṇāpūrṇa varaprada caritaṁ jñāpaya me te || 14 ||

जगदम्बामलसुन्दरगृहवक्षोवरयोगिन् ।

करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ १५ ॥

jagadambāmalasundaragṛhavakṣovarayogin |
karuṇāpūrṇa varaprada caritaṁ jñāpaya me te || 15 ||

दितिजान्तप्रद चक्रधरगदायुग्वरबाहो ।

करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ १६ ॥

ditijāntaprada cakradharagadāyugvarabāho |

karuṇāpūrṇa varaprada caritaṁ jñāpaya me te || 16 ||

परमज्ञानमहानिधिवदन श्रीरमणेन्दो ।

करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ १७ ॥

paramajñānamahānidhivadana śrīramaṇendo |
karuṇāpūrṇa varaprada caritaṁ jñāpaya me te || 17 ||

निखिलाघौघविनाशन परसोख्यप्रददृष्टे ।

करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते ॥ १८ ॥

nikhilāghaughavināśana parasoukhyapradadṛṣṭe |
karuṇāpūrṇa varaprada caritaṁ jñāpaya me te || 18 ||

परमानन्दसुतीर्थमुनिराजो हरिगाथाम् ।

कृतवान्नित्यसुपूर्णपरमानन्दपदैषिन् ॥ १९ ॥

paramānandasutīrthamunirājo harigāthām |
kṛtavānnityasupūrṇaparamānandapadaiṣin || 19 ||

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं

द्वादशस्तोत्रेषु दशमस्तोत्रं सम्पूर्णं ॥

|| iti śrīmadānandatīrthabhagavatpādācārya viracitaṁ
dvādaśastotreṣu daśamastotraṁ sampūrṇaṁ ||

## अथ एकादशस्तोत्रम्

atha ekādaśastotram

उदीर्णमजरं दिव्यममृतस्यंद्यधीशितुः ।

आनन्दस्य पदं वन्दे ब्रह्मेन्द्राद्यभि वन्दितम् ॥ १ ॥

udīrṇamajaraṁ divyamamṛtasyandyadhīśituḥ |
ānandasya padaṁ vande brahmendrādyabhi vanditam || 1 ||

सर्ववेदपदोद्गीतमिन्दिराधारमुत्तमम् ।

आनन्दस्य पदं वन्दे ब्रह्मेन्द्राद्यभि वन्दितम् ॥ २ ॥

sarvavedapadodgītamindirādhāramuttamam |
ānandasya padaṁ vande brahmendrādyabhi vanditam || 2 ||

सर्वदेवादिदेवस्य विदारितमहत्तमः ।

आनन्दस्य पदं वन्दे ब्रह्मेन्द्राद्यभि वन्दितम् ॥ ३ ॥

sarvadevādidevasya vidāritamahattamaḥ |
ānandasya padaṁ vande brahmendrādyabhi vanditam || 3 ||

उदारमादरान्नित्यमनिन्द्यं सुन्दरीपतेः ।

आनन्दस्य पदं वन्दे ब्रह्मेन्द्राद्यभि वन्दितम् ॥ ४ ॥

udāramādarānnityamanindyaṁ sundarīpateḥ |
ānandasya padaṁ vande brahmendrādyabhi vanditam || 4 ||

इन्दीवरोदरनिभं सम्पूर्णं वादिमोहनम् ।

आनन्दस्य पदं वन्दे ब्रह्मेन्द्राद्यभि वन्दितम् ॥ ५ ॥

indīvarodaranibhaṁ sampūrṇaṁ vādimohanam |
ānandasya padaṁ vande brahmendrādyabhi vanditam || 5 ||

दातृसर्वामरैश्वर्यविमुक्त्यादेरहो वरम् ।

आनन्दस्य पदं वन्दे ब्रह्मेन्द्राद्यभि वन्दितम् ॥ ६ ॥

dātṛsarvāmaraiśvaryavimuktyāderaho varam ।
ānandasya padaṁ vande brahmendrādyabhi vanditam ।। 6 ।।

दूराद्दूरतरं यत्तु तदेवान्तिकमन्तिकात् ।

आनन्दस्य पदं वन्दे ब्रह्मेन्द्राद्यभि वन्दितम् ॥ ७ ॥

dūrāddūratarаṁ yattu tadevāntikamantikāt ।
ānandasya padaṁ vande brahmendrādyabhi vanditam ।। 7 ।।

पूर्ण सर्वगुणैकार्णमनाद्यन्तं सुरेशितुः ।

आनन्दस्य पदं वन्दे ब्रह्मेन्द्राद्यभि वन्दितम् ॥ ८ ॥

pūrṇa sarvaguṇaikārṇamanādyantaṁ sureśituḥ ।
ānandasya padaṁ vande brahmendrādyabhi vanditam ।। 8 ।।

आनन्दतीर्थ मुनिना हरेरानन्द रूपिणः ।

कृत स्तोत्रमिदं पठन्नानन्दमाप्नुयात् ॥ ९ ॥

ānandatīrtha muninā harerānanda rūpiṇaḥ ।
kṛta stotramidaṁ paṭhannānandamāpnuyāt ।। 9 ।।

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं

द्वादशस्तोत्रेषु एकादशस्तोत्रं सम्पूर्णं ॥

।। iti śrīmadānandatīrthabhagavatpādācārya viracitaṁ
dvādaśastotreṣu ekādaśastotraṁ sampūrṇaṁ ।।

## अथ द्वादशस्तोत्रम्

atha dvādaśastotram

आनन्दमुकुन्द अरविन्दनयन ।

आनन्दतीर्थपरानन्दवरद ॥ १ ॥

ānandamukunda aravindanayana |
ānandatīrthaparānandavarada || 1 ||

सुन्दरीमन्दिर गोविन्द वन्दे ।

आनन्दतीर्थपरानन्दवरद ॥ २ ॥

sundarīmandira govinda vande |
ānandatīrthaparānandavarada || 2 ||

चन्द्रसुरेन्द्रसुवन्दित वन्दे ।

आनन्दतीर्थपरानन्दवरद ॥ ३ ॥

candrasurendrasuvandita vande |
ānandatīrthaparānandavarada || 3 ||

चन्द्रकमन्दिरनन्दकवन्दे ।

आनन्दतीर्थपरानन्दवरद ॥ ४ ॥

candrakamandiranandakavande |
ānandatīrthaparānandavarada || 4 ||

वृन्दारकवृन्दसुवन्दित वन्दे ।

आनन्दतीर्थपरानन्दवरद ॥ ५ ॥

vṛndārakavṛndasuvandita vande |
ānandatīrthaparānandavarada || 5 ||

मन्दारसूनसुचर्चित वन्दे ।

आनन्दतीर्थपरानन्दवरद ॥ ६ ॥

mandārasūnasucarcita vande |
ānandatīrthaparānandavarada || 6 ||

इन्दिरानन्दक सुन्दर वन्दे ।

आनन्दतीर्थपरानन्दवरद ॥ ७ ॥

indirānandaka sundara vande |
ānandatīrthaparānandavarada || 7 ||

मन्दिरस्यन्दनस्यन्दक वन्दे ।

आनन्दतीर्थपरानन्दवरद ॥ ८ ॥

mandirasyandanasyandaka vande |
ānandatīrthaparānandavarada || 8 ||

आनन्दचन्द्रिकास्यन्दक वन्दे ।

आनन्दतीर्थपरानन्दवरद ॥ ९ ॥

ānandacandrikāsyandaka vande |
ānandatīrthaparānandavarada || 9 ||

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं

द्वादशस्तोत्रेषु द्वादशस्तोत्रं सम्पूर्णं ॥

|| iti śrīmadānandatīrthabhagavatpādācārya viracitaṁ
dvādaśastotreṣu dvādaśastotraṁ sampūrṇaṁ ||

॥ भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु ॥

|| bhāratīramaṇamukhyaprāṇāntargata śrīkṛṣṇārpaṇamastu ||